CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जुलाई २००१ ईसवीयाब्दः R.N.I. Regd No. UPBIL/1998/1485

प्रयागपुरीय गुरुकुल महाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

"भारते भातु भारती"

जयताद् विश्वे भारतदेशः

—श्री पद्मशास्त्री
१२८, मुक्तानन्द नगर, गोपालपुरा मार्ग
जयपुर-१८ (राजस्थान)

हिमगिरिनिर्झरझरिताः शुभ्राः
हिमकणगलिताः सुधाबिन्दवः।
कृषकाणां सन्तापं हर्तुं निरताः
सततं सप्तसिन्धवः।
मञ्जुल-वन-उपवनपरिवेशः
शिष्टजनानां प्रियो विशेषः ॥१॥
जयताद्.....

निगमागमविज्ञानधनोऽयं
विश्वगुरोर्गौरवसयुक्तः।
देशान् पाशनिबद्धान् मोक्तुं
यतमानः स्वयमपि निर्मुक्तः।
सर्वधर्मसमतामय एषः
दत्तः पञ्चशीलसन्देशः ॥२॥
जयताद्.....

मातृभूमिरक्षार्थं शूराः
सीम्नि सीम्नि सन्नद्धाः सन्ति।
सदोद्यताः प्राणानपि त्यक्तुं
केचन कारगिले विचरन्ति।

धर्मसङ्गरं कर्तुं ह्येषः
धरां समुद्धरते खलु शेषः ॥३॥
जयताद्.....

प्रजातन्त्रशासनसम्पृक्तः
संविधान्न-समताजलसिक्तः।
ऐक्यमन्त्रपरिपुष्टो देशः
स्वस्थो सर्वाङ्गेषु विभक्तः।
सस्यधनादिसमृद्धिविशेषः
पुण्यतमो न हि संशयलेशः ॥४॥
जयताद्.....

जनकल्याणी मानवदृष्टिः
शिवसंकल्पयुताः स्यात् सृष्टिः।
अणु-दनुसम्मोहितेऽत्र विश्वे
वर्षतु शान्तिसुधारसवृष्टिः।
जनगणमनसि हि नव-उन्मेषः
सत्वशालिनामयमुपदेशः ॥५॥
जयताद्.....

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भारतोदयः

संस्कृत–मासिकपत्रम्

वर्षम्–६२ अङ्कः - १

सम्पादकः

डॉ० हरिगोपालशास्त्री

व्याकरणाचार्यः

एम्०ए०, पी–एच्०डी०

राष्ट्रपति–पुरस्कृतः

सह–सम्पादकः

डा० केशवप्रसाद उपाध्यायः

साहित्याचार्यः

एम्०ए०, पी–एच्०डी०

प्रबन्ध–सम्पादकः

डा० अजयकौशिकः

एम्०ए०, साहित्याचार्यः

प्रकाशकः

गुरुकुलमहाविद्यालयः ज्वालापुरम्
हरिद्वारम्- २४६४०५
(उत्तराञ्चल–प्रदेशः)

शुल्क विवरणम्

प्रत्यङ्कम्	—	५/–
वार्षिकम्	—	५०/–
आजीवनम्	—	५००/–

विषयानुक्रमणिका

१–श्रुतिसुधा	—महर्षिदयानन्दः सरस्वती	३
२–सन्त-अग्नायाः पूर्वप्रदोषः	—श्री रमाशङ्करतिवारी	४
३–अस्थिरं क्षुद्रसौहृदम्	—श्री कृष्णदत्तशर्म्मा शास्त्री	७
४–जने-जने संस्कृतग्रीभविष्यति	–श्री फणिनारायण सिन्देलः	११
५–वन्दे वाल्मीकि-कोकिलम्	—श्री सूर्यनारायण मूर्तिः	१५
६–गढदेश–शतकम्	—डा० सुन्दरलालः उनियालः	१८
७–स्वकीया निजसंस्कृतिः	—श्री द्वारकाप्रशादशास्त्री	२०

गुरुकुल ज्वालापुर, हरिद्वार

-डा. विक्रम अलकार, ✆ ४१६२६६

जयति–जयति गुरुकुल ज्वालापुर, हम तेरा करते अभिनन्दन !
तेरा निर्मल ज्ञान ज्योतिमय , महके कण–कण जैसे चन्दन !!

सच्चे श्रम से तन–मन धन से, श्री शास्त्री जी ने तुझे सुझाया ।
तब पग धर काँटों, कुसुमों पर, गंगाजल प्यासों तक आया ।।
ऐसा मोहक शान्त-तपोवन, यमुना– तीरे ज्यों वृन्दावन !!

यहाँ नित ज्ञान– सरोवर जल से, बाल– हंस मोती चुगते हैं !
स्वच्छ शारदे माँ मधुवन में, प्रतिभा के अंकुर उगते हैं !
होते सफल यहाँ सब मंथन, ऐसा कुछ तेरा प्रबंधन !!

कभी यहाँ गीता की वाणी, कभी गूँजती वेद ऋचाएं ।
फूल हंसे बच्चे मुस्कायें , बहती शीतल—मंद हवाएं ।
धन्य—धन्य वह प्राणी जिसने, यहाँ जीया अपना कुछ जीवन !!

फुलवारी सा अनुशासन है, पंखुरियों सा कोमल प्यार ।
तेरी अभिनव संस्कृति का, अनुपम सत—रंगी श्रृंगार ।
यहाँ के जड़—चेतन में जीवित, गरिमा का स्पदन !!

प्रगति पथ पर पाँव अग्रसर, निश्चित बढते ही जायेंगे ।
श्रेष्ठता के चरम—शिखर पर, ध्वजा आपकी फहरायेंगे ।
ओ शिक्षा के तीर्थ—निकेतन, शत–शत वन्दन तुझको अर्पण !!

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्वालापुरीय–गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

भविक-भरित-भारतोदयोऽयं भव-विभवोद्भवभावनाभिलाषी ।
भगवति भुवि भक्ति-भावभाजां भव-भय-भाव-भरं भ्रियान्नभूमन् ॥

× × ×

निशम्यतां लेख–ललाम–सञ्चय–प्रकाशने येन कृतोऽतिनिश्चयः ।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः' ॥

वर्षम् – ९२ | श्रावण २०५८ विक्रमाब्दः, जुलाई २००१ ईसवीयाब्दः | अङ्कः – १

श्रुतिसुधा

ओ३म् प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना ।
अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हवामहे ॥

—ऋग्वेद १/१०१/१

पदार्थः —

(प्र) प्रकृष्टार्थे । (मन्दिने) आनन्दिन आनन्दप्रदाय । (पितुमत्), सुसंस्कृतमन्नाद्यम् । (अर्चत) प्रदत्तेन पूजयत । अत्र 'अन्येषामपि दृश्यते (अ० ६/३/१३६), इति दीर्घः । (वचः) प्रियं वचनम् । (यः) अनूचानोऽध्यापकः । (कृष्णगर्भाः) कृष्णा विलिखिता रेखाविद्यादयो गर्भा यैः, ते । (निरहन्) निरन्तरं हन्ति । । (ऋजिश्वना) ऋजवः सरलाः श्वानो वृद्धयो यस्मिन् अध्ययने, तेन । अत्र श्वन्शब्दः श्विधातोः कनिन्– प्रत्ययान्तो निपातित उणादौ । (अवस्यवः) आत्मनोऽवो रक्षणादिकमिच्छवः । (वृषणम्) विद्यावृष्टिकर्तारम् । (वज्रदक्षिणम्) वज्रा अविद्याछेदका दक्षिणा यस्मात्, तम् । (मरुत्वन्तम्) प्रशस्ता मरुतो विद्यावन्त ऋत्विजोऽध्यापका विद्यन्ते यस्मिन्, तम् । (सख्याय) सख्युः कर्मणे भावाय वा । (हवामहे) स्वीकर्महे ॥१ ॥

भावार्थः —

मनुष्यैर्यस्माद् विद्या ग्राह्या, स मनोवचःकर्मधनैः सदा सत्कर्तव्यः । येऽध्याप्यास्तै प्रयत्नेन सुशिक्ष्य विद्वांसः संपादनीयाः । सर्वदा श्रेष्ठैर्मैत्रीं संभाव्य सत्कर्मनिष्ठा रक्षणीया ॥१॥

— महर्षिदयानन्दसरस्वती

[ऋग्वेदभाष्यम्, तृतीयो भागः, ५३४ पृष्ठे]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्त-अग्नायाः पूर्वप्रदोषः (४)

—श्री रमाशङ्करतिवारी
२०, लक्ष्मणपुरी, फैजाबातः (उ०प्र०)

(३०)

सा शिश्ये नीलनेत्रच्छदयोः निमीलितयोर्वा,
क्षौमे श्लक्ष्णे शुक्लीकृते सौरभिते लवेन्दरेण,
यदाऽऽनयति सः निभृतकोष्ठात् राशिम्
मधुरसेवश्रीफलबदरीफलानां रुचिकराणाम्
सहितं फलपक्वैः प्रियतरैः शरमयदधिभ्यः,
सुस्वादुमधुभिः दालचीनेन ईषन्मिश्रितेन,
मन्नारवर्जूराणां[1] समानीता हि पोतेषु
फेजात्[2] एवञ्च सुवासितखाद्यानां मृदूनाम्,
समानीतानां कौशिक-समरकन्दात्[3] देवदारुयुतलेबनानाच्च[4] ॥

(३१)

सः राशीकरोति मृदुखाद्यानि एतानि दीप्तिमन् पाणिना,
स्वर्णनिर्मितशरावेषु दीप्तियुतपिटकेषु वै
रजत-सूत्रितेषु वा न्यस्तेषु तत्र खल्वतिशय्यपूर्वम्,
अथ निभृतप्रशान्तौ रजन्याः,
ये पूरयन्तः शिशिरकक्षं किल लघुसौरभेण ।
'अथ मम दयिते ! मम स्वर्गदूत ! त्यज निद्रामिदानीम्,
त्वं भवसि स्वर्गो मदोयः अहमस्मि तापसस्त्वदीयः,
उन्मीलय तव नेत्रे किल सन्त-अग्नायाः हेतोः,
नो चेत् अहं क्षयिष्यामि पार्श्वे त्वदीये एवं पीड्यते खल्वात्मा मदीयः' ॥

सन्दर्भाः – (१) 'मन्ना' इति एकं मधुरं फलं पतितं गगनात् इसराईलवासिनां कृते भ्रमणशीलानां जंगलेषु बाइबिलकथनानुसारेण । काव्ये 'मन्ना' सूचयति किमपि मधुरं फलम् ।
(२) 'फेज' इत्यस्ति एका नगरी मोरक्को नाम देशे 'दक्षिण अफ्रीका' इति महाद्वीपे ।
(३) समरकन्द इति नाम नगरी तुर्किस्तान-देशे प्रसिद्धा तस्याः कौशेय–व्यापारस्य ।
(४) 'लेबनान' इति एकः पर्वतः 'फिलीस्तीन'- देशे यत्र देवदारुवृक्षाः वर्तन्ते प्राचुर्ये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(३२)

एवं नीचैः वदतः तस्य उष्णीभूतबलवञ्चितः पाणिः,
संपतति मैडेलाइना–वालिशे, वर्तते तस्यास्तु स्वप्नः ।
प्रच्छादितः तामसजवनिकायां ह्यभिचारो निशीथे
ना शक्नोति विगलितुम् इव हिमीभूतस्रोतः,
भास्वद्रजतभाजनानि परिस्फुरन्ति चान्द्रे प्रकाशे,
आस्तरणे तु वर्तते अञ्चलः स्वर्णखचितस्तु विपुलः,
इदं प्रतिभाति यत् सः नो शक्नुयाच्च मौक्तुम्
तस्य प्रियायाः नेत्रे एतादृश सम्मोहनेन ।
अथ चिन्तयामास सः मुहुर्तं संश्लिष्टः परितन्त्रिव–कल्पनासु ।।

(३३)

उत्तिष्ठन् सः गृह्णाति तस्याः सुषिरां वल्लकीम्,
तथा प्रस्फुरत् कोमलतमतन्त्रेषु वै,
प्रगायति गानमेकं पुरातनं खलु चिरं न गीतम्,
'सुन्दरी निष्करुणा' इत्याख्यं फ्रान्सदेशे[1]
समीपे तस्याः कर्णस्य सुमधुरम्
येनाकुलीभूता सोच्चारयति स्निग्ध–दीर्घरावम्,
सः विरमति सा निःश्वसिति तीव्रमकस्माच्च,
तस्याः नीलभयभीत–नेत्रयुगलं चकास्ते,
सः नमति जानुभ्यां विवर्णः इव प्रस्तरप्रतिमा तक्षिता च स्निग्धम् ।।

(३४)

तस्याः नेत्रे उन्मीलिते तदपि साऽपश्यत्,
यदा प्रजागरा दृश्यं निद्रायाः तस्याः ।
ननु पोडादायिपरिवर्तनं घटितं यदपाचकार
प्रहर्षान् स्वप्नसुलभान् पवित्रान् गभीरान्,
यतः मैडेलाइना प्रारभते रोदितुम्,
वदति सनिश्वासं निरर्थकाः वाचश्च प्रचुरम्,
यावत् सा निर्वर्णयति किल पार्फिरं तु सततम्,
यो ववृते पतितः जानुभ्यां बद्धाञ्जलिः करुणदृष्टिः,
भीतः सञ्चरितुं ह्यथवा च वक्तुं सा वीक्षते इव स्वप्नदशायाम् ।।

सन्दर्भः - (१) 'लाबेली डेम सान्स मर्सी' इति नाम तत्कवितायाः । कीट्स विरचितवान् स्वयमेव इत्याख्यामेकां लघुकवितां यस्यां प्रेमिणः तत्सुन्दर्याः प्रलुब्धाः तस्याः सौन्दर्येण अन्ततो बन्दीकृताः तस्याः ललितावासे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(३५)

'आः पार्फिर ! ' वदति सा, 'अचिरात् पूर्वम्
तव स्वनः कम्पितः मम कर्णरन्ध्रे सुमधुरम्,
विहितः मधुमयः प्रत्येकललितशपथेन वै
तव नेत्रे ववृताते भास्वती ह्यपार्थिवे च,
कियत् परिवर्तितो भवसि कियद्विवर्णः शून्यदृष्टिः !
प्रयच्छ मे तत् स्वनं पुनश्च, अयि पार्फिर ! मम
तानि दर्शनानि ह्यमर्त्यानि तानि प्रणय-निवेदनानि,
आः ! मा परित्यज मामेतस्मिन् चिरन्तने च दुःखे,
यतो हि यदि त्वं म्रियसे, मे दयित ! न जानामि गच्छेयं तु कुत्र ? ।।

(३६)

उत्तिष्ठति पार्फिर श्रुत्वा प्रणयगर्भंवाचस्तस्याः
आवेश-पूर्णः समुल्लङ्घ्य मर्त्यं मानवन्तु
स्वर्ग्यः अरुणवदनः प्रस्फुरत् तारकः इव,
दृष्टः महानील-गगनस्य गहनशान्तौ,
संविलीयते सः तस्याः स्वप्ने यथा पाटलं
मिश्रयति तत् सौरभ किल 'वायलेटेन[1] '
'ननु योगश्च मधुरः' अत्रान्तरे प्रवहति हैमवायुः,
इव प्रेम्णः, प्रबोध-ध्वनिः, पटपटायमानः
वातायन-काच-फलकैः 'सन्त–अग्नायाः चन्द्रोऽस्तं गतश्च' ।।

(३७)

तिमिरोऽस्ति, हिमघनः पटपटायते निर्वापितो वायुवेगैः,
'नो स्वप्नोऽयं, मम दयिते, ! मम मैडेलाइने !
तिमिरोऽस्ति हिमगर्भ-पवनः गर्जति कम्पते च ।,
'अहो बत ! नो स्वप्नः ! अहो बत ! हा कष्टं मत्कृते च '
पार्फिरः त्यक्ष्यति मामत्र स्थले क्षयितुं च म्लातुम्,
निर्दय ! कः विश्वम्भघाती ह्यानयति त्वामत्र ?
अहं ना शपामि यतो मम ह्यदयं त्वयि विलीनम्,
यद्यपि त्वं त्यक्ष्यसि मां, प्रवञ्चितं जीवं च दीनम्,
खलु कपोतिकामनाश्रयां च्युतां रुग्णां ह्यच्छिनन्पक्षं विभेमि ।।

[क्रमशः]

सन्दर्भः – (१) 'वायलेट' इति एकं कुसुमं नीललोहितवर्णम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्थिरं क्षुद्रसौहृदम्

—श्रीकृष्णदत्तशर्म्मा शास्त्री
८१, जवाहरगंज, हापुड, गाजियाबाद (उ.प्र.)

विक्रमसिंहः –

लते ! अत्र एहि क्षणं तावत् ।

लता –

आयामि ! सम्प्रति व्यापृताऽस्मि ।

विक्रमः –

क्षणं शृणु तावत् ।

लता –

किमत्यावश्यकमापतितम् ?

विक्रमः –

समागच्छेत्तु निवेदयामि ।

लता –

कथयतु, किं घटितम् ?

विक्रमः –

पश्यतु तावत् ।

लता –

किं पश्येयम् ?

विक्रमः –

सम्प्रत्येव पत्रवाहकः पत्रं प्रदाय गतोऽस्ति ।

लता –

कस्य पत्रं समागतम् ? पत्रं नाम मम पुत्रस्य तु न वर्तते ? ।

विक्रमः –

सत्यम्, तस्यैव वर्तते ।

लता –

किं लिखितम् ? कुशली तु सर्वथाऽसौ ?

विक्रमः –

तस्य नास्ति कुतोऽप्यमङ्गलम् । मङ्गलं तु मे नास्ति । तस्य गृहाद् गतस्य पक्षोऽपि न व्यतीतः । मया तस्मै पञ्चाशद् रूप्यकाणि प्रदत्तानि, परम् अद्य पुनः पत्रस्य माध्यमेन सन्दिष्टं यत् पञ्चाशद् रूप्यकाणि केनापि सेवकेन प्रेषितव्यानि। किं विधेयम् ! नाहमत्र हेमाद्रि-शिखरारूढः ।

लता –

श्रीमन् ! पुत्रो मे छात्रावासे उषित्वा विद्यालये विद्याध्ययनरतः । धनस्य तु अपेक्षा वर्तत एव । धनं नूनमेव प्रेषणीयम् ।

विक्रमः –

लते ! मन्येऽहं भूमिपालः (जमीदार) अस्मि । ईश्वरप्रसादात्नात्र कापि न्यूनता । परं धनस्य सदुपयोग एव कार्यो न तु दुरूपयोगः । गतवर्षेऽपि नवमकक्षापरीक्षायां साफल्यं नावाप । अनुत्तीर्ण एव घोषितः ।

लता –

श्रीमन् ! नात्र मे पुत्रस्य दोषः । प्रश्न-पत्राण्येव कठिनानि आसन् । अन्येऽपि केचन छात्रा अनुत्तीर्णा अभवन्, न केवलं मे पुत्र एव ।

विक्रमः –

लते ! तव पुत्रस्तथा तस्य समानशीला वयस्या एव अनुत्तीर्णा आसन्, न तु कश्चित् परिश्रमी छात्रः ।

लता –

यदि गतवर्षे साफल्यं नाप त्वस्मिन् वर्षे साफल्यं प्राप्स्यति । कथ चिन्ताकुलो भवान् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विक्रमः –

लते ! मया त्वेतदपि श्रुतं यत्ते पुत्रोऽमरसिंहो दुर्व्यसनासक्तोऽध्ययनमुपेक्ष्य समयात् पूर्वमेव जागतिकं सुखमनुभवति । तस्य सहचरा अपि त एव दुःशीला विद्यार्थिनः सन्ति, ये दुर्व्यसनासक्तास्तं मिथ्या प्रशंसन्ति । अमरश्च आत्मान महान्तं मन्यमानस्तान् धूर्तान् मुक्तहस्तधनव्ययेन पोषयति, भोजयति, तोषयति च । ते तं तेष्वेव कर्मसु योजयन्ति, यत्र तेषां स्वार्थसिद्धिर्भवेत् । अमरस्तान् स्वार्थिनः स्वहितैषिणो मत्वा सदैवानुरञ्जयति । श्रुतं तु मयैतदपि वर्तते यत् स तैर्दुःशीलैः मित्रैः सह कक्षामुपेक्ष्यान्यत्रैवाटति । वारुणीं सेवते । प्राणघातकमादकपदार्थानप्युपसेवते । स्वधूर्तमित्रैः सहासौ काभिश्चिद् भद्रकन्याभिर्बहुशो भर्त्सितः प्रताडितश्च । तस्यौच्छृङ्खल्यम् असहमाना अध्यापकाः शान्ता धृतमौनाश्च सन्ति । अत एव यदहं तस्य विद्यालयस्य प्रबन्धसमितिसदस्योऽस्मि विपुलधनप्रदायकश्च । अमरः सर्वथा भ्रष्टमार्गः सञ्जातः । तं सत्पथे समानेतुं कोऽप्युपायस्तु करणीय एव ।

लता –

यद्यत्र नालीकं तु तस्य जीवनं तु नश्यत्येव, आवयोरपि जीवनं नरकायितं भविष्यति ।

लताविक्रमौ द्वावेवाशान्तचित्तावास्तां यत् किमत्र विधातव्यम् ? । विक्रमेण धनं न प्रेषितम् ।

अपरेद्युः केनापि कारणविशेषेण विक्रमः सपत्नीको नगरं गतवान् । तौ द्वौ स्ववाहनारूढावास्ताम् । मार्गे गच्छता विक्रमेण विद्यालयस्य समये स्वपुत्रोऽमरः एकस्मिन् सरोवर-तटे कैश्चिन् मित्रैः सह विहरन् विलोकितः । तं तत्र विलोक्य चकितो जातः । तं स्वपत्नीम् अपि अदर्शयत् ।

विक्रमः –

लते ! पूर्वं यच्छ्रुतं तदद्य दृष्टमपि ।

अविज्ञातवृत्तान्तोऽमरसिंहः स्वमित्राभ्यां सह मासान्तः पूर्वमेव स्वगृहमाप । यथैवासौ पितरं ददर्श तु पितरमपृच्छत् 'धनं कथं न प्रेषितम् ? विना धनं किमहं करिष्ये । अद्यैव यथेप्सितं धनमादाय प्रतिनिवर्तिष्येऽहं मित्राभ्यां सह ।'

विक्रमः – सर्वं जानन्नपि अज्ञातरहस्य इव सौहार्देन अवोचत्- 'वत्स ! अधुनाहं महाविपद्ग्रस्तोऽस्मि । ममाधीनमेकम् आग्नेयास्त्रं राज्यानुमतिं विना अवैधरूपेण वर्तते । आरक्षिदलस्तदाग्नेयास्त्रं समुपलभ्य मां बन्दिनं विधातुं प्रयतमानोऽस्ति । आरक्षिदलेन तदाप्तं चेत्तु नूनमेवाहं बन्दी भविष्यामि । तदा मे प्रतिष्ठा धूलीसात् भविष्यति ।

अमरः –

पितृदेव ! तदत्र मया किं करणीयं वर्तते ?

विक्रमः –

वत्स ! अपि त्वदीयाविमौ वयस्यौ ते हितैषिणौ ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अमरः –

पितृदेव ! इमौ द्वौ मे प्रगाढ-वयस्यौ । विपदि मे सहायकौ । यत्र मे प्रस्वेद-बिन्दुः पतति, तत्रेमौ स्वरक्तं पातयिष्यतः । मदर्थं तु स्व-प्राणानपि समुत्स्रष्टुं तत्परावेमौ ।

विक्रमः –

अपि पूर्णविश्वस्तोऽसि त्वमनयोः ? एतौ स्वार्थिनौ नाम तु न ? एतत्तु न यत् तव धन एव अनयोस्तथाऽन्येषां स्पृहा भवेत् न त्वयि ?

अमरः –

न, पितृदेव ! न । मम वयस्याः सर्वथा विश्वसनीया एव । तेषां मैत्रो शुद्धा निर्व्याजा च वर्तते ।

विक्रमः –

वत्स ! एतत्तु श्रुतं भवेत्—

पापान्निवारयति योजयते हिताय,
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं न जहाति, ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।।

अमरः –

पितृदेव ! श्रुतमेव न पठितमपि । मयेमौ बहुवारं परीक्षितौ, परीक्षिताश्चान्येऽपि ।

विक्रमः —

इत्थं चेत्तु निरापदोऽस्मि । निश्चिन्तोऽत्र सञ्जातः । वत्स ! अधुना त्वयैतदाचरणीयम्, यदहं त्वां तदाग्नेयास्त्रं वस्त्रेण सुसंवेष्टितं केनाप्यविज्ञातं ददामि । त्वया स्वमित्रमेतदुक्त्वा दातव्यम्– 'मित्र ! एतदाग्नेयास्त्रं राज्यानुमतिं विना मे पित्रा अधिकृतं वर्तते । आरक्षिदल एतदवाप्य पितरं मे बन्दिनं विधातुं यत्नपरः वर्तते । कञ्चित् कालमेतदाग्नेयास्त्रं स्वगृहे निगूहेः ।

अमरः पित्रा दत्तं वस्त्रान्तर्निहितं पदार्थमादाय स्वकीयमेकं मित्रमुपेत्य यत्पित्रा अभिहितं तत्तदेवोक्तवान् । तद्वचनमाकर्ण्य स प्रत्यवदत्– मित्र ! नाहमत्र किमपि कर्तुं क्षमः । यद्येतदहं स्वगृहं नयामि, तदा तु आरक्षिदलो मां मे परिजनांश्च निगडितान् विधाय कारागारे निक्षेपस्यति । स्वयमेव बेतालोपस्थानं न करिष्यामि । तद् वचनमाकर्ण्य अमरसिंहः सहसा आकाशाद् भूमावपतत् ।

अमरः —

अपि नासीः त्वं मे सखा ?

मित्रम् —

अस्मि, परं जानन्नपि कथमात्मानं कूपे पातयामि ।

अमरोऽपरं सखायमप्युपगम्य तथैवावोचत् यथा प्रथमम् अवादीत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपरोऽपि तदेवोत्तरं दत्तवान् यत् प्रथमः सखा अवादीत् । अमर आत्मग्लानिमन्वभवत् । खिन्नमानसो म्लानमुखः पितरम् उपेत्य किमप्यनुक्त्वा मौन एवातिष्ठत् ।

विक्रमः —

वत्स ! परीक्षितावितौ द्वावेव सखायौ ? किं तयोः केनचिदेकेनापि ते निवेदनं स्वीकृतम् ? मया यद् दत्तं तत् तव हस्त एव राजते । एतत् सूचयति यत् केनापि ते निवेदनं नाङ्गीकृतम् । वत्स ! यथैतौ तथैवान्येऽपि । तेषां ते धने रुचिर्नतु त्वयि । सम्प्रति अपि भव सावधानः । गत्वा पश्य तावत् ते तौ द्वौ सखायौ किं कुरुतः ?

अमरस्त्वौ समुपयाति तु पश्यति यदेकोऽपि तयोर्नास्ति । द्वावेव ततः पलायितौ ।

विक्रमः —

वत्स ! अमर ! समीपस्थचत्वरपार्श्वे मे बाल-सखा निवसति 'रघुवंशः' । तमुपगम्य यन्मया कथितं तत् तं निवेदय । विश्वसिमि स नूनमेव स्वजीवनं न गणयन् सहायको भविष्यति ।

अमरो रघुवंशमुपेत्य पित्रादिष्टं न्यवेदयत् । तेन किमप्यनुक्त्वा तद् गृहीतम् । सुरक्षित-स्थाने सन्न्यस्य तेनोक्तं च वत्स ! आपत्स्वेव मित्रं जानीयात् । ततः प्रतिनिवृत्य पितरमुपागत्य यथाघटितं तथा वर्णितम् ।

विक्रमः —

वत्स ! सम्प्रत्यपि किमपि वक्तव्यमव शिष्यते । नैतत् कदापि विस्मरेत् यत् 'समसंस्थितस्य तु बहवो बान्धवाः, सम्बन्धिनः, परिचिताश्च तथैवोत्पद्यन्ते यथा वर्षर्तौ बहुवर्णका मण्डूकाः, परं विषमस्थितस्य निकटसम्बन्धिनोऽपि तथैव विलीयन्ते यथारुणोदये जाते तारकाः ।

अमरः —

पितृदेव ! अद्य मेऽज्ञानतमो नष्टम् । वेदितव्यं विदितं जातम् । मद् धन-बलेन ऐन्द्रसुखमुपभुज्यमानानिमान् धूर्तवयस्यान् नाद्यतोऽङ्गीकरिष्यामि । अद्यत एव सबलं प्रयतिष्ये यदहं भवेयम् तदेवभविष्यामि ।

अमरः किमपि धनमलब्ध्वा यथागतस्तथा गतः । छात्रावासं गत्वा पूर्वं तु तेन ते सर्वे दुःशीला वयस्याः परित्यक्ताः । ततश्च सर्वाण्येव दुर्व्यसनानि हित्वा सुशीलो विनम्रो विद्यार्थी जातः । तस्य परिवर्तितं व्यवहारं विलोक्य छात्रावासीया विद्यार्थिनो विद्यालयीयाः छात्रा अध्यापकाश्च बहुप्रभाविता अभवन् । स्वाध्यायाध्यवसाय-बलेन तेनामरसिंहेन वार्षिकी परीक्षा न केवलमुत्तीर्णा, अपितु सर्वाधिका अंकाः समर्जिताः । अध्यापकैः प्रधानाध्यापकेन च अमरसिंहो बहुप्रशंसितः । विद्यालयस्य च आदर्शः छात्रो गणितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जने जने संस्कृत-गीर्भविष्यति

—श्री फणिनारायणः सिग्देलः
श्री तौलेश्वरनाथ संस्कृत माध्यमिक विद्यालयः
कपिलवस्तु नगरपालिका-५, तौलिहवा, कपिलवस्तु (नेपाल)

(१) (१)

करुणामय ! भक्तवत्सल !,
भगवन्नच्युत ! धर्मरक्षक ! ।
विशदां मतिमीश ! देहि नः
परभाषादि-तमः प्रणाशिनीम् ।।

(२) (२)

परगीर्विधिराहुरेधते
छलपापादि-तमः प्रसारयन् ।
बत विश्वजनीनमादृतं
ग्रसमानः सुरगीर्दिवाकरम् ।।

(३) (३)

इह तच्छिर-कर्तनक्षमाः
शतशः सन्ति कवीन्द्र–विष्णवः ।
परमद्य निरायुधा इमे
बहुशः सन्ति निरुद्यमास्तथा ।।

(४)

नवगीति–सुदर्शनेन हि
स तु बध्यो न परैर्महायुधैः ।
तदमोघमिहास्ति केवलं
कवि–विष्णुभ्य इदं समर्पये ।।

(५) (५)

छल–कूट–घृतैः प्रवर्धते
पर-भाषा-विधिवह्निरुच्छिखः ।
स दिधक्षति नोऽखिलानिमान्
जनभाषा–विधि–कल्प-शाखिनः ।।

(६) (६)

कवि-मेघ-गणाः समासते
कविता-व्योम्नि परं न ते क्षमाः ।
नव-नीति–बलाहकैर्विना
शमने तद् दहनस्य जात्वपि ।।

(७) (७)

परगीर्विधिकेशरी छली
जनभाषाविधिरीतिगोमृगान् ।
स्वयमत्ति मिथश्च योधयन्
सकलान् संहरते क्रमेण सः ।।

(८) (८)

नव-शिक्षण-योजनान्धकः
सुरभाषानायनं स नोऽच्छिदत् ।
अपरं प्रमुखासुरास्ततो
जनभाषानयनं तुदन्ति नः ।।

(९) (९)

यदि न प्रथमाक्ष्यभेत्स्यत
न परं तर्ह्यपरैरतोत्स्यत ।
अदविष्यत नो मनस्तदा-
ऽभ्यभविष्यन्न विपच्च दुःसहा ।।

(१०) (१०)

उभयोरपि नेत्रयोस्तथा
कविवैद्या नहि योजने क्षमाः ।
नवनीति- महौषधिं विना
कवि-वैद्येभ्य इमामतोऽर्पये ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(११)

न छलेन विना कथञ्चन
छलवाञ्जीयत आशु मानवैः ।
नव-नीति-महाछलेन हि स
निपात्योऽस्त्यत एव सज्जनाः ॥

(१२)

कविता नहि सन्त्यमूमम
नहि विद्वानहमस्मि कश्चन ।
सृतिरेव नवा प्रकाशिता
विषयेऽस्मिन् यः परत्र चिन्त्यताम् ॥

(१३)

इह दुष्कृति-राशिरेधते-
ऽनुदिनं यः परभाषयैव सः ।
करणीयमतो यथा भवेद-
तिदूरे परवाक् तथाशुऽऽतत् ॥

त्रिभाषिका नीतिः

(नेपालस्य कृते)

१- अनिवार्य-नेपाली भाषा
२- अनिवार्य-विदेशभाषा (अंग्रेजी)
३- राष्ट्रियभाषा (मातृभाषा अथवा संस्कृतं प्राकृतं वा)

(१४)

इह नीतिरतस्त्रिभाषिका
भवितव्या सकलस्य भूतये ।
निजराष्ट्रगिरोऽनिवार्यता-
ऽऽङ्गलवाण्याश्च विरोधिता नहि ॥

(१५)

निजमातृगिरेषिणो जना
सुरबाण्यै बहुशः शपन्त्यमी ।
सुरगीर्निजगी ष्वतो जना
अधिगृह्णन्तु गिरं निजेच्छया ॥

(१६)

न विरोत्स्यति कोऽप्यमुं सृति-
मत आस्नातकपूर्वमिष्यते ।
स्वगिरां व्ययमुद्वहन्त्वितो
नगर-ग्रामविकास-मालिकाः ॥

(१७)

इह राष्ट्र-गिरः सुशिक्षका
बहुशः संस्कृत-शास्त्र-पाठिनः ।
अतिरिक्त-धनव्ययो न हि
सुरवाण्या अत एव सज्जनाः ॥

(१८)

न पदैर्न च साधनैरपि
जनभाषाः सुरगीस्समा इमाः ।
सरलार्थकरी च देववा-
गनिवार्येव भविष्यति स्वतः ॥

विशेष संस्कृत-शिक्षा-नीतिः

(नेपालस्य भारतस्य च कृते)

१- अनिवार्य-संस्कृतम् (सरलम्)
२- कवर्गे, अन्यभाषाद्वयी, अथवा संस्कृतशास्त्रम्, अथवा आधुनिक-शास्त्रम् ।
३- खवर्गे संस्कृतशास्त्रम्, आधुनिकशास्त्रं वा
४- अतिरिक्त-भाषाः, अतिरिक्त-विषयाः वा
५- अनिवार्य-नेपाली (केवलं नेपालस्य कृते)
अनिवार्य हिन्दी (केवलं भारतस्य कृते)

(१९)

अथ संस्कृत-शिक्षणे विधौ
नव-धारा द्विविधा भवेत् स्फुटा ।
सरलाऽथ गरीयसी परा
प्रथमायाः प्रथमाब्दतः क्रमात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(२०)

अनिवार्यमथास्तु संस्कृतं
सरलं चाधुनिकाः कवर्गगाः ।
इतरत्रवदित्थमेष्वपि
नवशास्त्राध्ययनञ्च संभवेत् ॥

(२१)

विषयाश्च गिरः स्युरैच्छिकाः
प्रतिवर्गञ्च नवाः पुरातनाः ।
अथ शास्त्र-विधौ नवो भवे-
दुपवेदोऽपि य आयुरत्र यः ॥

(२२)

अतिरिक्तविशिष्टरूपतो-
ऽप्यपरे सन्तु यथेच्छया तथा ।
परदेश-गिरोऽनिवार्यता
न भवेत् सस्कृतमिच्छयैषु तु ॥

(२३)

सकलस्य न वृत्तिरिष्यते
सुरगीः शास्त्रविदां कृतेऽस्तु सा ।
उपवेद–फले च तद्गतिः
प्रथमा स्यादथ तद् रुचिर्भवेत् ॥

आयुर्वेद (B.A.M.S.) विषये विवेकः

(२४)

अस्मत्संस्कृतकल्पवृक्ष इह भो ! विच्छिद्यमानोऽरिभि-
रायुर्वेदफलान्वितोऽस्तु स कथं, शोशुष्यमानोऽस्त्यतः
स्वामित्वं च फलेषु तस्य छलतो यद् वैरिणा स्थापितं
सिक्त्वा वृत्तिजलेन संस्कृततरोः पत्रेषु किं स्यात्
फलम् ॥

(२५)

कार्यं भूमिगतं नयेन विधिना तन्मूलसंघं बुधाः
न्यायो न्यायपथेन लभ्यत इतः शीघ्रं विदेशादपि ।
प्राप्यं संस्कृतसेविभिर्नहि परन्यायेन तत् स्याद् यदा
भूमौ मूलचयं तदा प्रतिदिनं वृद्धिं गमिष्यत्ययम् ॥

(२६)

आस्था लोहपथे प्रभञ्जनजवं सर्वान् समादय नः
सम्यक् यच्चलतिस्म संस्कृतमहायानं कथा साऽधुना ।
मेकाले-विधिनाऽरिणा छलवता पन्थाः स विध्वंसित-
स्तद् वोढुं कवयो यतन्त उदितं दैत्यं न तं घ्नन्त्यहो ॥

(२७)

एतेनैव हनिष्यते स दनुजः सन्नीतिचक्रेण हि
तन्निर्मेयमिहाशु वर्त्म सुगमं विद्वत्पथज्ञेस्ततः ॥
सर्वे जाग्रतु युक्तिबुद्धिसहिताः सत्स्वाधिकाराय वै
शीघ्रं शत्रुतमः प्रणश्यतु ततः स्यात् संस्कृतार्कोदयः ॥

त्रिभाषिका नीतिः,

भारतस्य कृते भाषात्रयी ग्रह्या

(२८)

निर्मेया सृतिराशु सा सुमतिभि–
र्युक्त्या च बुद्ध्याययया
हिन्दीसंस्कृतयोरघोषिततया
ह्येकाऽनिवार्या भवेत् ।
भाषाः स्युः गणपञ्चकेऽथ च तत-
स्तिस्रोऽनिवार्या गिरो
हिन्दी केवलमस्तु तत्र प्रथमे
नान्या भवेत् काऽपि गीः ॥

(२९)

स्यातां प्राकृत-संस्कृते नहि परा तद्वद् द्वितीये गणे
सर्वाः प्रान्तगिरोऽग्रिमे स्युरपरा नान्या तृतीये गणे ।
तुर्ये यावनवाण्य एव च ततस्त्वाङ्लादयः पञ्चमे
ग्राह्यैकैव गणेऽखिलेषु च तथा योगेन तिस्रो गिरः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(३०)

हिन्द्या अप्यनिवार्यताऽत्र न तत-
स्तद्द्वेषिणाञ्च प्रियम्,
म्लेच्छानाञ्च गिरोऽत्र सन्ति हि तत-
स्तेषामपि स्यात् प्रियम् ।
स्वीकार्या सकलस्य नीतिरमला
सेषा भविष्यत्यतः
कार्यं भारतवाग्भिरेव सकलं
कर्मादि नान्यस्य भो ! ।।

(३१)

हिन्दी भारतराष्ट्र-वागथ भवेत्
स्यात् सर्वमान्या ततो
भाषेयं सरलाऽस्ति संस्कृत-सुता
वैज्ञानिकी यल्लिपिः ।
नान्या तत्प्रतिमाऽस्ति काऽपि किमियं
स्यादाङ्ग्लभाषा क्वचि-
देकञ्चापि पदं विना न रटनं
यद् वर्तनीनां स्फुटम् ।।

त्रिभाषिका नीतिः

(सार्कस्य (SAARC) कृते)

१— हिन्दी भाषा
२— ऊर्दू भाषा
३ — आयोजक-राष्ट्रभाषा

(३२)

हिन्दी हेतुभिरेभिराशु जनवाक् स्याद् राष्ट्रभाषा प्रिया
सार्कस्यास्य कृते च नोतिरपरा भाषात्रयी विद्यते ।
स्यादायोजकराष्ट्रगीरथ भवेदूर्दू च हिन्दी तथा,
हिन्द्येवं क्रमशोऽखिलस्य च भवेत् सार्कस्य भाषा
प्रिया ।।

(३३)

सत्येवं क्रमशो भविष्यति ततः
स्याद् राष्ट्रसंघस्य गी-
हिन्दी मान्यतमा भविष्यति ततः
स्याद् विश्वभाषा दृढा ।
आयुवद-फले च संस्कृतविदां
पूर्णाधिकारे सति,
व्याप्ता स्याद् धरणीतले जनजने-
ष्वेवं ततो देववाक् ।।

(३४)

[1] आयुर्वेद-नयोऽयमेव [2]परवाग्र-
हानं [3]स्वभाषाग्रहः,
[4] संस्था स्वत्वसुरक्षिणी च सबला स्यात्
[5] संस्कृताख्या तथा ।
[6] भाषानीतिरियं [7] द्विधा च सरणी
स्यात् संस्कृते प्रस्तुता,
[8] धर्मभास-विधर्म-दानव-सुते
स्यादुग्रताख्या तथा ।।

(३५)

अष्टाङ्गैरुदितैरमीभिरतुलैः सन्नीतिवार्यादिभिः
पुष्यन् कल्पतरुः फलादि-सहितः सोऽयं समेधिष्यते ।
सत्येवं प्रतिगेहमाशु सुगीर्यायात् ततोऽसौ क्रमात्
स्यादेषैव जने जने च सुभगा विश्वस्य या कामधुक् ।।

(३६)

भवतां गुणिनां पुरस्कृता
फणिनारायण-शर्मणा मया ।
निज-सम्मतये प्रसारण-
व्यवहारार्थमियं नवा सृतिः ।।

अष्टाङ्ग-योजना १-इयमेवायुर्वेदनीतिः प्रस्तुता । २-जनभाषासु विदेशभाषा-शब्दानां त्यागः ।
३- जनभाषाशब्दानां राष्ट्रभाषायां समावेशः ४-स्वत्त्व- संरक्षिणी सबल-संस्था ।
५-संस्कृत-भाषा-महत्त्व-प्रचारः । ६-प्रस्तुता त्रिभाषिका-नीतिः
७- धाराद्वयी संस्कृत-शिक्षा-नीतिः । ८- विधर्मग्रन्थानामुग्रतायाः प्रसारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वन्दे वाल्मीकि-कोकिलम्

–श्री जोश्युलः सूर्यनारायणः मूर्तिः
२०/२६२/२ ब्रह्मपुरम्, पारसपेट, मछिलीपत्तनम्
जनपद कृष्णा ५२१००२ (आन्ध्रप्रदेशः)

संस्कृतसाहित्ये अर्थात् भारतीय–साहित्ये एव श्रीमद्रामायण-महाकाव्यं आदिकाव्यत्वेन सम्भाव्यते प्रायः । **'नानृषिः कुरुते काव्यम्'** इत्यस्य वाक्यस्य वाल्मीकिर्यथार्थमुदाहरणं वर्तते । सहजतयैव वाल्मीकिर्महर्षिः । अतः **'यो न भवति ऋषिः, सः न कुरुते काव्यम्'** इत्यस्य प्रथमो दृष्टान्तः आदिकविवाच्यो महर्षिर्महाकविश्च वाल्मीकिरेव । तथैव 'विश्वश्रेयः काव्यम्' इत्यस्याः शास्त्रोक्तेश्च समुचितं प्रथमोदाहरणं वाल्मीकि-रामायणमहाकाव्यमेव । आलङ्कारिकाणाम् अर्थाद् लाक्षणिकाणामनुशासनमिदम् । दृष्ट्येतया यदि रामायणस्य समुचितमध्ययनं कुर्मस्तर्हि ज्ञायते यद् इदं काव्यं सर्वथा समग्रं काव्यलक्षणोपेतं भासते । अतः कवितायाः माधुर्यस्यास्वादनसमये इयं प्रार्थना समुचिता सुन्दरा भक्ति-प्रपत्तिप्रेरका च भासते ।

यथा—

'कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकि-कोकिलम् ।।'

वाल्मीक्याख्यः कोकिलः कविताशाखाम् आरुह्य कूजति । एतावानेव न किन्तु वाल्मीकिरयं मुनिसिंहोऽपि यो वनचारी सन् (अजकवितैव वनम्) रामकथानादं करोति । गर्जत्ययं सिंहः आत्मनो रामकथानादेन चास्य गर्जनं श्रृण्वन् कः पुमान् परां गतिं नाप्नोतीति पृच्छत्यनुभवज्ञो भक्तः । परा गतिर्नाम भीत्या प्राणत्यागः अथवा मोक्षप्राप्तिरिति च गम्यते । यथा–

'वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः ।
श्रृण्वन् रामकथानादं को न याति परां गतिम् ।।'

अनेन ज्ञायेते रामायणस्य महिमा तत् कर्तुश्च प्रभावविशेषश्च यद् श्रीमद् रामायणं मोक्षस्य साधनमिति च । इत्थमिह परसाधकस्य महा-काव्यस्य कर्ता वाल्मीकिस्तदा प्रभृत्यस्मत्काल-पर्यन्तं अथ चागामिनि काले च प्रातः स्मरणीयो भवति भविष्यति चेति ज्ञायते । अस्मद् भारतवर्षे श्रीमद्रामायणमहाकाव्यम् अग्रश्रेणी-मधिरुह्य विराजते इत्येष निर्विवादो निष्कर्ण एव । कान्तासम्मिततयोपदेशतया भासते । कथादृष्ट्या तु आदर्शपात्रनिधानं ज्ञानस्य भाण्डारं भासते । इत्थं कथायाः कथकस्य चेदं शाश्वतत्वं सम्पादयति । शाश्वतत्वं च कवितायाः अपेक्षणीयं प्रधानं लक्षणमित्यवगम्यते विज्ञैः । अत एवेदं सर्वेषां कवीनामादर्शप्रायं विभाति । यदत्र सार्वदेशिकाः सार्वकालिकाश्च बहवस्सन्ति विशेषाः तस्मादेव कथितं महाराजेन भोज-राजेन **'मधुमय-फणितीनां मार्गदर्शी महर्षिः ।'** इति स्वीये रामायणचम्पूकाव्ये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न एतदेव केवलम् अपितु श्रीमद् रामायणं साक्षाद् वेद एव । परे पुंसि अर्थात् परमात्मनि दशरथात्मजत्वेन जाते सति वेदोऽपि रामायणात्मानां प्राचेतसाद् अर्थात् प्रचेतसः (वरुणस्य) पुत्रात् आसीत् । वेदः रामायणात्मना प्रतिपन्नः इत्यर्थः रामायणरूपं धृत्वा वेदः साक्षात् करोति । यथोक्तं समुचितम्—

'वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना ।।'

अनेनास्माभिर्ज्ञातव्यमस्ति यत् व्यासमहर्षिकृतो भारतेतिहासः पञ्चमः वेदः इति सम्भाव्यते चेद् रामायणं वाल्मीकिर्महर्षिकृतं साक्षात् वेद एव, न तस्यैकदेशं तदनन्तरसंख्याकं वेति । अत एव तदा प्रभृत्येतावत् पर्यन्तं भारतीयानाम् इमे कृती एते च महर्षिः प्रातर्वन्दनीयौ पुण्यनिधी भवतः ।

ग्रन्थावेतौ भारतीयविज्ञानसर्वस्वतया भासतः, अस्मत्पुण्यफले च । तथा सर्वस्यापि संसारस्य सार्वकालिकीं भिक्षामक्षयविज्ञानमयीं प्रदास्यतः ।

अनया विनम्रया विनत्या सह अद्य सीतारामयोः दाम्पत्यजीवनस्य ऐरम्मदीं कान्तिं दृष्ट्वा मधुरामनुभूतिमात् पुं प्रयतामः । स्थालीपुलाकन्यायमनुसृत्यैवायं प्रयत्नः क्रियते ।

'प्रिया तु सीता रामस्य' कुतः ? **'दाराः पितृकृता इति'** न केवलमेतावदेव किन्तु सा आत्मानोऽपि प्रयस्यैव । यदित्थं रामस्य हृदि समुत्पन्नं प्रेम भूयोऽप्यवर्धत । ('प्रीतिर्भूयोऽप्यवर्धत' । कुतो हेतोः ? गुणाद् रूपगुणाच्चापि (रूपगुणः उत्तमस्वभावश्च) सीतादेवी उत्तमगुणवती परमसुन्दरी च । अत्र सीता रामस्य धर्मदारा (धर्मपत्नी) कथं ? तस्याः स्वपित्रा दशरथेन अङ्गीकृतत्वात् । वस्तुतः सीता रामेण विशिष्य वीर्यशुल्कं दत्वा स्वीकृता । इत्थं लब्धाम् आत्मनः पत्नीं (सीतां) कर्तुं जनकप्रार्थितो दशरथमहाराजः स्नुषात्वेन स्वीकर्तुं यदि नेच्छति तदा किं भवेत् ? अस्योत्तरं नावगच्छति रामः । सः तु वस्तुतः पितृवाक्य (आदेश) परायणो धर्मात्मा अद्य प्रभृत्येव वयं रामस्य विग्रहवद्धर्मत्वं पितृवाक्पालनपरायणत्वं च पश्यामः । ततस्ततः **'रामो विग्रहवान् धर्मः'** इति मायाविना मारीचेन प्रशंसितः यथार्थकथनेन ।

रामस्य सीतया सह पाणिग्रहणं तत् पित्रा दशरथेन (यस्तस्य प्रत्यक्षदैवतम्) अंगीकृतमित्येतद्रामस्य समुत्साहजनकमभवत् । अतस्तस्य सीता प्रिया । रामहृदये समुत्पन्नं प्रेम पितृकृताङ्गीकृत्या भूयो व्यवर्धत । एतद्धार्मिकं प्रणयमभवत् । इदं च सहजस्य प्रेम्णः पावित्र्यं प्रतिपादयति । एतदेव च धार्मिकप्रेम कथ्यते । अस्य चादर्शपुरुषः श्रीरामचन्द्रप्रभुरेव । श्रेयस्कामी, आयुष्कामी च लोकः साम्प्रदायिकं उत्तमसंस्कृति-सम्पन्नं प्रणय-विशेषमनुसरेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईदृशीं समीक्षां कृत्वा यदि वयं पश्येम तदा अस्य सन्निवेशस्य सम्बन्धिकविहृदयमवगम्यते । अत एवोक्तं कविना—

'प्रिया तु सीता रामस्य दारा: पितृकृता इति ।'

ईदृशां धार्मिक-मर्मणां निधि: श्रीमद् रामायणं नाम । अद्य सीतारामयो: प्रेम्ण: पावित्र्यं प्रवृद्धिं प्रवृत्तिं च पश्याम: तर्हि सीताया: हृदि राम: कथं बर्तते ? तस्याश्च भर्ता द्विगुणं हृदये परिवर्तते । यथा रामस्य हृदये सीता ततो द्विगुणं रामस्तस्य हृदये वर्तत इत्यनेन ज्ञायते सीतायै राम: प्रियतमो भर्ता वर्तते इति । अर्थात् सर्वदा रामस्तस्याश्चित्तं एव जीवति । अतोऽत्यधिकतरं को वा प्रेम्णो विशिष्टतामौन्नत्यम् अथवा पावित्र्यं वर्णितुं शक्नोति ? तत: कविवरो ऋषिवर एवं तदाख्याति—

'अन्तर्गतमभिव्यक्तमाख्याति हृदयं हृदा ।'

अत्र 'हृदयं हृदयेनाख्याति' इत्यनेन ज्ञायते यद् वैशाल्यमनिर्वचनीयता विशुद्धता च ।

रामोऽपि न ऊन एतस्मादिति कथ्यते । कथनमिदं कथितं यथा—

'मनस्वी तद्गतमना नित्यं हृदि समर्पित: ।'

स्वयमेवात्मनो हृदयं समर्प्य तद्र गतमना बभूवेत्यनेन चात्र सीता-रामयोर्नववधूवरयो: परस्परं प्रेमनिर्भरत्वम् आत्मसमर्पणत्वञ्च च कविर्व्यक्तीकृतवान् । इत्थं बहवो ऋतव विकृतास्ताभ्यामिति च कथितं कविना । यथा—

'तस्य भूयो विशेषेण मैथिली जनकात्मजा ।
दवताभिस्समारूपे सीता श्रीरिव रूपिणी ।।'

ध्वनिमार्गमनुसृत्येत्थं महर्षिणा वाल्मीकिकविवरेण सीता–रामौ साक्षाच्छ्रीलक्ष्मीनारायणावेवेति द्योतयति रम्यफणितिमाश्रित्य । समवलोकनीयं तद्यथा—

'तया स राजर्षिसुतोऽभिरामया
समेयिवानुत्तम- राजकन्यया ।
अतीव राम: शुशुभेऽतिकामया
विभु: श्रिया विष्णुरिवामरेश्वर: ।।'

उपमामाश्रित्य न तु रूपकेण महाकविर्वाल्मीकिरेवमनेकानि रामकथारहस्यानि रम्याणि निक्षिपत्यात्मीये मधुरे आदिकाव्ये । तदनन्तरं कवयश्च तान्यनेकान्यवगम्य स्वीयकृतिषु च निक्षिपन् । अत एव वाल्मीकिर्मधुमयफणितीनां मार्गदर्शी महर्षि: वर्तते । **'जयन्ति ते सुकृतिनो रससिद्धा: कवीश्वरा:'** कालिदास - प्रभृतय: ।

इत्थमद्य वाल्मीकिनो जयन्त्याख्ये २०५८ विक्रमाब्दस्य द्वितीये आश्विन-शुक्लपूर्णिमायां (तदनुसारं १-११-२००१ तमे ईसवीयाब्दे) पुण्य–पर्वणि तत् स्मरणं नमस्करण-पूर्वकं तस्य व्यक्तित्वकृतित्वयोर्निदर्शनं कृत्वा पुनीता: भवाम: । वस्तुतस्तद् गाभीर्यं समग्रता नावगम्यत एव खलु । ✱

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गढदेश-शतकम्

-डा० सुन्दरलालः उनियालः प्रवक्ता-संस्कृतस्य
राजकीय इण्टर कालेज नथुवावाला, देहरादून (उत्तरांचलम्)

राजकीय इण्टर कालेज, नथुवावाला, देहरादून
डा. सुन्दरलाल
उनियाल
प्रवक्ता - संस्कृत

(१) (१)

गरीयसी या किल देवलोकात्,
सुपूजिता वै तु समग्र-विश्वे।
जगद्गुरुं तां भरतस्य भूमिं,
नमामि चादौ शिरसा सुपूज्याम् ॥

(२) (२)

यशांसि यस्याः सततं प्रसन्नाः,
गायन्ति देवाः किल देवलोके।
तपोमयी सा भरतस्य भूमिः,
धन्यास्ति लोके निजनाम- धन्या ॥

(३) (३)

विशाल-सिन्धुः स्वयमेव यस्याः,
पादाम्बुजान् धौति सदैव लोके।
शैलाधिराजः मुकुटन्नु यस्याः,
विभाति भाले रजतस्य शुभ्रम् ॥

(४) (४)

सदैव देवा अपि यत्र जन्म,
इच्छन्ति लब्धु हि विहाय स्वर्गम्।
सत्यस्य शीलस्य च जन्मदात्रीं,
नमामि पूज्यां भरतस्य भूमिम् ॥

(५) (५)

अनेकवारं स्वयमेव विष्णुः,
मनुष्यरूपेण विधृत्य जन्म।
पापात्मनां वं सुविनाश-हेतोः
चकार यस्यां विविधास्तु लीलाः ॥

(६) (६)

प्रान्ता अनेके विविधाश्च भाषाः,
जात्याः विभेदाः विविधाश्च धर्माः।
वै सन्ति यस्यास्तु सुभूषणानि,
नमामि तान् भारत-भूमि-पादान् ॥

(७) (७)

अस्याश्च भूमेः दिशि उत्तरस्यां,
नगाधिराजस्य पवित्र-क्रोडे।
विराजिता या किल देव-भूमिः,
नमाम्यहं तां शिरसा सदैव ॥

(८) (८)

पञ्चेषु खण्डेषु हिमालयस्य,
केदारखण्डे गढ़देश-भूमिः।
विराजते सा तु तथैव लोके,
यथास्ति स्वर्गे ह्यमरावती च ॥

(९) (९)

वसन्ति देवास्तु सदैव यस्यां,
पवित्र-पूताश्च वहन्ति नद्यः।
देवाधिदेवस्य विशालभूमिं,
नमाम्यहं तां शिरसा सदैव ॥

(१०) (१०)

शिवेन साकं हि करोति वासं,
शैलाधिराजस्य सुता तु यस्मिन्।
गणैः महेशस्य विभूषितं तं,
नगाधिराज शिरसा नमामि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu